E-ISSN-2584-2870 https://doi.org/10.65833/dbs.2026.332

केन्द्रीयसंस्कृतविश्वविद्यालयः
श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः
देवभूमि-सौरभम्
E-ISSN 2584-2870
Devabhūmisaurabham

Vol 3 Issue 1 Jan-June 2026 Devabhūmisaurabham International Journal of CSU Shri Raghunath Kirti Campus Devprayag Uttarakhand India

# शब्दशक्तिप्रकाशिकादिशा अव्ययीभावसमासस्वरूपविमर्शः॥

**वासुदेवगराइ,(BASUDEV GORAI)**
**शोधच्छात्रः,रामकृष्णमिशन्-विवेकानन्द-शैक्षणिकशोधसंस्थानम्,**
**वेलुड़मठः, पश्चिमबङ्गराज्यम्-711202**
**दूरवाणी- 7501757388,**
**ईमेल- basudev.garai.vedvid@gmail.com**

## शोधसारः

शब्दशक्तिप्रकाशिकादिशा अव्ययीभावसमास स्वरूपविमर्शः इत्याख्ये अस्मिन् शोधप्रबन्धे जगदीशमतं विहाय अपि वैयाकरणमतं, मीमांसकमतम् आलोचितं विद्यते। तत्र प्रकाशिकाकारः आचार्यः जगदीशतर्कालङ्कारः यद्यपि नैयायिकः एव तथापि नैयायिकचूडामणेः सारमञ्जरीकारस्य श्रीमज्जयकृष्णस्य मतमपि उल्लिखितं विद्यते। एवम् आहत्य अत्र चतूर्णाम् आचार्याणां मतानि उपस्थापितानि विद्यन्ते। वैयाकरणमतत्वेन सिद्धान्तमञ्जूषाकारस्य नागेशस्य मतं गृहीतम् अस्ति। एतेषां मतानां च सम्यक् पर्यालोचना अस्मिन् प्रबन्धे मया विहिता। मतानां विमर्शकाले क्वचिल्लक्षणे दोषः अपि उद्भाव्य यथामति समाहितः विद्यते।

**कूटशब्दाः**-शब्दशक्तिः,अव्ययीभावसमासः,पूर्वपदम्,उत्तरपदम्,लक्षणा।

## प्रस्तावना

मदीयप्रबन्धलेखस्य विषयो भवति शब्दशक्तिप्रकाशिकादिशा अव्ययीभावसमासस्वरूपविमर्शः इति। संस्कृतवाङ्मये मुख्यतमविषयेषु समासः अन्यतमः। प्रक्रियादिशा यथा अस्य प्रकरणस्य माहात्म्यं विद्यते तथैव दार्शनिकदृष्ट्या अपि। अत एव दर्शनान्तरेषु अपि

दार्शनिकाः अस्य स्वरूपम् उपन्यस्य कृतकृत्याः भवन्ति। तत्र च प्रधानतया विषयेऽस्मिन् नैयायिकमीमांसकवैयाकरणेषु च विवादः परिलक्ष्यते। न्यायग्रन्थेषु जगदीशतर्कालङ्कारेण विरचिता शब्दशक्तिप्रकाशिका अन्यतमा। अतः अस्मिन् प्रबन्धे तन्मतमादाय अव्ययीभावसमासस्वरूपं वर्ण्यते, प्रसङ्गतया च वैयाकरणमतं मीमांसकमतमपि स्वीक्रियते।

**नागेशमतम्॥**

आचार्येण नागेशेन वैयाकरणसिद्धान्तमञ्जूषायां वृत्तिविचारे वृत्तिस्वरूपनिरूपणावसरे विशेषसंज्ञाविनिर्मुक्तः समासः, विशेषसंज्ञायुक्तः समासः इति समासस्य द्वैविध्यं प्रादर्शि। तत्रैव विशेषसंज्ञायुक्तः समासः चतुर्धा इत्युक्तम्। एवं विशेषसंज्ञकानां समासानां साधारणलक्षणं कृतं "तत्पुरुषत्वादिसंकेतविशेषसम्बन्धेन तत्परुषादिपदवत्त्वमि"[1]ति। तदनुगुणतया अव्ययीभावस्य लक्षणं भवति अव्ययीभावत्वसंकेतविशेषसम्बन्धेन अव्ययीभावपदवत्त्वमिति। अस्य उदाहरणमुक्तम् आचार्येण हरौ इत्यधिहरि भक्तिः इति। तथा च अधिहरि इति समुदायः "अव्ययीभावः[2]" इत्यधिकारपठितेन "अव्ययं विभक्तिसमीपसमृद्धिव्यृर्द्ध्यर्थाभावात्ययासम्प्रतिशब्दप्रादुर्भाव-पश्चाद्यथानुपूर्व्ययौगपद्यसादृश्यसम्पत्तिशाकल्यान्तवचनेषु"[3] इति सूत्रेण अव्ययीभावपदवान्, तत्त्वं समुदाये इति लक्षणसमन्वयः। अत्र अधिः सप्तम्यर्थवाचकः। तथैव उपकृष्णम् इत्यत्र उपशब्दः समीपार्थवाचकः। एतत्तु अव्ययानां वाचकत्वाभिमतेन। अत एव "पूर्वपदार्थप्रधानोऽव्ययीभावः" इति संगच्छते। सिद्धान्ते तु निपाताः द्योतकाः इति नये द्योत्यार्थस्य विशेषणतया तद्विरोधः स्पष्टः एव। अत एव उपकुम्भमित्यादौ कुम्भादिपदानां तत्समीपादौ लक्षणा इत्यपस्तम्। लक्षणास्वीकारेऽपि पूर्वपदस्य तात्पर्यग्राहकत्वात् तस्य प्राधान्याभावेन पूर्वपदार्थप्रधानोऽव्ययीभावः इति कथनमसङ्गतमेव।अत एव उत्सर्गबाधभिया कुम्भादिपदे लक्षणा अपि न स्वीक्रियते। किञ्चात्र उपसर्गाणां वाचकत्वे प्रजयतीत्यादौ द्योतकत्वे "द्योत्यार्थविशेषणकबोधे, उपकुम्भमित्यादौ च वाच्यार्थविशेष्यकबोधे कारणमिति पृथक्कार्यकारणभावः कल्पनीयः", तच्च गौरवमेव। अस्मादपि कारणात् उपसर्गाणां वाचकत्वमेव स्वीकार्यम्। एवमेव अतिनिद्रमित्यादौ बोध्यम्। एवं पूर्वपदार्थप्रधानोऽव्ययीभावः इति उत्सर्गसत्त्वेऽपि तस्य उन्मत्तगङ्गम्. इत्यादौ अव्याप्तेः, द्वियमुनम्, सप्तगङ्गमित्यादौ अतिव्याप्तेः प्रायिकत्वमेव युक्तम्। तस्य उत्सर्गत्वं तु स्वीक्रियते एव।

---

[1]वैयाकरणसिद्धान्तलघुमञ्जूषायाः वृत्तिविचारे, पत्रसंख्या-613

[2]पाणिनिसूत्रम्-२.१.५

[3]पाणिनिसूत्रम्-२.१.६

**जयकृष्णमतम्॥**

आचार्येण श्रीमज्जयकृष्णेन अव्ययीभावस्य लक्षणम् उक्तम्- "समासग्रस्तत्वे सति नानाविभक्तिभिरेकरूपतावत्पदत्वमव्ययीभावत्वम्"[4] इति। अर्थात् प्राप्तसमाससंज्ञकत्वे सति विभक्तियोगे एकरूपतावत्पदविशिष्टसमुदायत्वम् अव्ययीभावत्वमिति अव्ययीभावस्य लक्षणं भवति। यथा उपकुम्भमित्यत्र समुदायस्य समासग्रस्तत्वात् सकलविभक्तिभिर्योगे उपकुम्भमित्येवम् एकरूपतावत्पदत्वात् अव्ययीभावत्वम्। उपकुम्भमित्यस्य कुम्भसम्बन्धिसमीपम् इति शाब्दधीः। अत्र च पूर्वपदार्थस्यैव प्राधान्यं भवति। एतच्च निपाताः वाचकाः इति पक्षमादाय। सिद्धान्तभूतद्योतकत्वपक्षे तु द्योत्यार्थस्य प्राधान्याभावात् कुम्भपदमेव कुम्भसमीपलक्षकं भवति। अतः पूर्वपदार्थप्रधानत्वरूपलक्षणं प्रायिकम्। केवलानाम् अव्ययानामपि नानाविभक्तिभिरेकरूपता विद्यते अतः तत्र अतिव्याप्तिवारणाय समासग्रस्तत्वे सति इति विशेषणम्। समासग्रस्तपदसमुदायस्य एकरूपता इति भावः। ननु अकारान्ताव्ययीभावानां तृतीयापञ्चमीसप्तमीषु च अमादेशेन एकरूपताभावात् कथं लक्षणमिदं सङ्गच्छते इति चेत् तेषामपि बह्वीषु विभक्तिषु अमादेशवत्त्वेन एकरूपतायोगान्नाव्याप्तिरिति बोध्यम्।

**मीमांसकमतम्-**

मीमांसकचूडामणिभिः गागाभट्टैः भाट्टचिन्तामणिग्रन्थे "पूर्वपदार्थप्रधानोऽव्ययीभावः, यद्वा अव्ययार्थप्रधानोऽव्ययीभावः"[5] इति अव्ययीभावसमासलक्षणमुक्तम्। समस्यमानपदोपस्थापितयोः अर्थयोः यत्र पूर्वपदार्थस्य प्राधान्यं सः अव्ययीभावसमासः उच्यते। यथा अधिहरि इत्यस्मात् हरिनिष्ठाधिकरणता इत्यर्थः प्रतीयते, तत्र पूर्वपदमस्ति अधि तस्य अधिकरणत्वमर्थः, स च प्रधानतया प्रतीयते अतः अधिहरि इति अव्ययीभावसमासः इत्युच्यते। किञ्च अव्ययीभावसमासे सदैव अव्ययपदस्य पूर्वनिपातः भवति, अतः तत्र अव्ययार्थस्यैव प्राधान्यं भवति इति धिया अव्ययार्थप्रधानः

[4]सारमञ्जर्याः समासवादे, पत्रसंख्या-65

[5]भाट्टचिन्तामणिः, पत्रसंख्या-107

अव्ययीभावः इत्यपि लक्षणं सङ्गच्छते।परन्तु एतल्लक्षणम् उन्मत्तगङ्गम् इत्यत्र अन्यपदार्थस्य प्राधान्यात् अव्याप्तम्, अतः अव्ययार्थप्रधानत्वाविद्यमानावयवार्थत्वविशिष्टान्यपदार्थप्रधानत्वान्यतरत्वमव्ययीभावत्वम्[6] इति स्वीकार्ययम्। अधिहरि इत्यादेः अव्ययार्थप्रधानत्वात् उन्मत्तगङ्गमित्यादेश्च अविद्यमानावयवार्थत्वविशिष्टान्यपदार्थप्रधानत्वात् न क्वचिद्दोषः।

**शब्दशक्तिप्रकाशिकाकारमतम्-**

**"उत्तरार्थान्वितस्वार्थाव्ययपूर्वस्तु यो भवेत्।**

**समासः सोऽव्ययीभावः स्त्रीपुंलिङ्गविवर्जितः"[7]॥**

उत्तरशब्दः उत्तरपदे लाक्षणिकः, उत्तरस्य अर्थः, उत्तरार्थः, तेन अन्वितः स्वार्थः यस्य सः उत्तरार्थान्वितस्वार्थः, स च तद् अव्ययम् उत्तरार्थान्वितस्वार्थाव्ययम्, तत् पूर्वं यस्य(समासस्य) सः उत्तरार्थान्वितस्वार्थाव्ययपूर्वः, तथा च उत्तरपदार्थान्वितस्वार्थरूपाव्ययपूर्वपदविशिष्टः स्त्रीपुंलिङ्गविवर्जितः नपुंसकमात्रलिङ्गः समासः अव्ययीभाव इत्युच्यते। यथा अधिहरि इति समुदायः, तस्य च हरिनिष्ठाधिकरणता इत्यर्थः। अत्र उत्तरपदम् अस्ति हरि, उत्तरपदार्थः हरिः, पूर्वपदमस्ति अधि तस्य च अधिकरणता इत्यर्थः, तस्य च उत्तरपदार्थेन हरिणा सह अन्वयः अस्ति(अत्र अव्ययार्थः विशेष्यं, अतः तस्य विशेष्यतासम्बन्धेन विशेषणे हरौ अन्वयः), ततश्च उत्तरपदार्थान्वितस्वार्थरूपाव्ययम् अधि इति अव्ययम्, तत् अधिहरि इति समुदाये पूर्वमेव विद्यतेऽतः अधिहरि इति समुदायः उत्तरपदार्थान्वितस्वार्थरूपाव्ययपूर्वपदविशिष्टः, नपुंसकमात्रलिङ्गः अतः अयं समुदायः अव्ययीभावसंज्ञकः। नपुंसकत्वञ्चास्य समुदायस्य अव्ययीभावश्च[8] इति पाणिनीयशास्त्रात् लोकतो वा। अस्य लक्षणस्य परिष्कृतः अर्थः एवं लिखितः अस्ति- "यादृशानुपूर्वी स्वघटकोत्तरपदप्रतिपाद्ययादृशार्थनिष्ठप्रकारतानिरूपितयादृशार्थविशेष्यताकबोधजनकतावच्छेदकाव्यय

---

[6]भाट्टचिन्तामणिः, पत्रसंख्या-107

[7]

[8]पाणिनिसूत्रम्-२.४.१८

पूर्वभागकत्वे सति स्त्रीपुंलिङ्गकार्यविधुरत्वे सति तादृशानुपूर्वीमत्समासत्वं तादृशार्थान्विततादृशार्थस्य बोधनेऽव्ययीभावत्वमि"[9]ति निष्कर्षः। यथा अधिहरि इत्यस्मात् वाक्यात् हरिनिष्ठाधिकरणता इति हरिप्रकारकाधिकरणताविशेष्यकबोधः भवति। अत्र च अधिहरित्वम् इति आनुपूर्वी, स्वपदेन लक्ष्यत्वे अभिमतमसुदायः, स च प्रकृते अधिहरि इति समुदायः, तद्घटकोत्तरपदं हरिपदम्, तत्प्रतिपाद्यः अर्थः हरिरूपार्थः, प्रकृतशाब्दबोधे च तत् प्रकारतया भासते अतः प्रकारता तन्निष्ठा, अधिपदार्थः अधिकरणत्वं बोधे च तत् विशेष्यतया भासते अतः विशेष्यता अधिकरणतानिष्ठा, विशेष्यताप्रकारतयोः निरूप्यनिरूपकभावः भवति अतः अधिहरिघटकोत्तरपदहरिप्रतिपाद्ययादृशार्थहरिनिष्ठप्रकारतानिरूपितयादृशार्थाधिकरणतार्थनिष्ठविशेष्यता, तया च बोधः निरूपितः भवति अतः अधिहरिघटकोत्तरपदहरिप्रतिपाद्ययादृशार्थहरिनिष्ठप्रकारतानिरूपितयादृशार्थाधिकरणतार्थनिष्ठविशेष्यताकबोधः, तादृशबोधजकम् अधि इति अव्ययं, जनकतावच्छेदकम् अधित्वम्, तत्पूर्वभागकः समुदायः अधिहरिसमुदायः, पूर्वभागकत्वं च समुदाये, अपि च सः समुदायः स्त्रीपुंलिङ्गविधुरः विधुरत्वं च समुदाये तादृशानुपूर्वीमत्समासः अपि अस्ति, समासत्वमपि समुदाये अस्ति, अतः तादृशार्थान्विततादृशार्थस्य बोधने अव्ययीभावत्वम्।अर्धशरीरमित्यत्र उत्तरपदार्थान्वितस्वार्थबोधकत्वे अपि अव्ययपूर्वभागकत्वाभावात् न व्यभिचारः, निर्मक्षिका` भूमिः, निर्मनुष्यो देश इत्यादौ उत्तरपदार्थान्वितस्वार्थबोधकाव्ययपूर्वभागकत्वे अपि स्त्रीपुंलिङ्गविधुरत्वाभावात् न व्यभिचारः।

ननु लक्षणमिदम् अक्षपरि शलाकापरि इत्यादौ अव्ययपूर्वभागकत्वाभावात् अव्याप्तम्, अथ यदि अव्ययघटितत्वमित्येव उच्यते तदा द्वौ गार्ग्यौ इत्यर्थे द्विगार्ग्यं गच्छतः इत्यत्र, द्विदण्डि(तिष्ठद्गुप्रभृतीनि च इत्यत्र इच् कर्मव्यतिहारे इति गणसूत्रं पठितम्, तेन दण्डादण्डि, मुसलामुसलि इति अव्ययीभावस्य उदाहरणमिति काशिकायाम्) प्रहरति इत्यादौ त्रियमुनं स्नाति, लोहितगङ्गं देशः

[9]शब्दशक्तिप्रकाशिकायाः विवृतिव्याख्या, पत्रसंख्या-107

इत्यादौ च अव्ययघटितत्वाभावात् लक्षणमिदम् अव्याप्तमेव, अत लक्षणमिदं परित्यज्य नूतनं लक्षणम् उच्यते-

**“अमादेशं विना श्रूयमाणषष्ठी न बोधिका।**

**स्वार्थे यदर्थस्य यद्वा सोऽव्ययीभाव इष्यते”[10]॥**

यद्वा अथवा अमादेशं विना अमादेशाभावे सति श्रूयमाणा षष्ठी यत्समुयार्थप्रकारकस्वार्थविशेष्यकबोधजनिका न भवति, सः समुदायः अव्ययीभावः इत्युच्यते।राजपुरुषस्य धनमित्यादौ राजपुरुषसम्बन्धि धनमिति बोधे राजपुरुषसमुदायप्रकारकषष्ठ्यर्थविशेष्यकबोधं प्रति अमादेशाभावे सति श्रूयणाणा षष्ठी कारणम् किन्तु स्निग्धस्य उपगङ्गं पावित्र्यम् इत्यादौ गङ्गासमीपप्रकारकषष्ठ्यर्थविशेष्यकबोधे अमादेशाभावे सति श्रूयमाणषष्ठी कारणं न भवति किन्तु अमादेशे सत्येव कारणं भवति अतः उपगङ्गसमुदायः अव्ययीभावः उच्यते इति सामान्यार्थः।

विनाशब्दस्य अभावविशिष्टत्वमर्थ, तस्य च षष्ठ्या सम्बन्धः, विनाशब्दार्थैकदेशे अभावे अमादेशमित्यत्र द्वितीयाविभक्त्यर्थप्रतियोगितायाः निरूपकत्वसम्बन्धेन अन्वयः, तथा च अमादेशं विना श्रूयमाणषष्ठी इत्यस्य अमादेशनिष्ठप्रतियोगितानिरूपकाभावविशिष्टश्रूयमाणषष्ठी इत्यर्थः। ततश्च अमादेशनिष्ठप्रतियोगितानिरूपकाभावविशिष्टश्रूयमाणषष्ठी समासार्थप्रकारकषष्ठ्यर्थविशेष्यकबोधजनिका न भवति स समासः अव्ययीभावः इत्युच्यते। वैशिष्ट्यञ्चात्र स्वसामानाधिकरण्येन आनुपूर्व्याम्। यथा राजपुरुषस्य इत्यत्र स्वम् अभावः, स च प्रकृते अमादेशनिष्ठप्रतियोगितानिरूपकः राजपुरुषत्वे अस्ति, षष्ठी अपि अस्ति अतः तयोः सामानाधिकरण्यं राजपुरुषत्वे तथा च अमादेशनिष्ठप्रतियोगितानिरूपकाभावविशिष्टश्रूयमाणषष्ठी राजपुरुषत्वे अस्ति एतादृशी षष्ठी च राजपुरुषप्रकारकषष्ठ्यर्थविशेष्यकबोधं प्रति जनिका एव अस्ति न तु अजनिका स्निग्धस्य उपगङ्गं पावित्र्यमित्यत्र तु उपगङ्गत्वे

[10] शब्दशक्तिप्रकाशिका, कारिका-42

अमादेशनिष्ठप्रतियोगितानिरूपकाभावविशिष्टश्रूयमाणषष्ठी एव नास्ति अतः तादृशी षष्ठी उपगङ्गप्रकारकषष्ठ्यर्थविशेष्यकबोधजनको न भवति अतः अयं अव्ययीभावसमासः अस्ति।

अमादेशं विना श्रूयमाणा विभक्तिः स्वार्थप्रकारकविभक्त्यर्थविशेष्यकबोजनिका न भवति इत्युच्यमाने उपकुम्भेन उपकुम्भात् इत्यादौ तृतीयादिविभक्तिः कुम्भसमीपप्रकारककरणादिविशेष्यकबोधं प्रति हेतुः अतः अत्र अव्याप्तिः स्यादतः तद्वारणाय षष्ठीविभक्तिः एतादृशबोधं प्रति हेतुः न भवति इत्युक्तम्। उपबधु इत्यादौ तु बधूसमीपकप्रकारकषष्ठ्यर्थविशेष्यकबोधः भवति, न चात्र षष्ठीविभक्तिः एतादृशबोधजनिका अतः अत्र अव्याप्तिः स्यात्, अतः श्रूयमाणषष्ठी इत्युक्तम्। अत्र तु लुप्ता षष्ठी विभक्तिः एतादृशबोधजनिका अस्ति, अतः नाव्याप्तिः। जनकत्वञ्चात्र स्वरूपयोग्यत्वमेव[11]। फलोपाधायकत्वरूपजनकत्वस्वीकारे तु फलोपाधायकत्वजनकताशून्यतत्पुरुषादौ श्रूयमाणषष्ठी यद्यपि स्वरूपयोग्या तथापि समासार्थप्रकारकषष्ठ्यर्थविशेष्यकबोधं प्रति न फलोपधायकत्वेन जनिका इति तत्र अतिव्याप्तिः स्यादतः स्वरूपयोग्यत्वमेवात्र जनकत्वं ग्राह्यम्। अत्र नञ्द्वयघटितलक्षणं विहाय अम्भावप्राप्तश्रूयमाणषष्ठी स्वार्थप्रकारकषष्ठ्यर्थविशेष्यकबोधजनिका सः अव्ययीभावः इत्युच्यमाने उपकुम्भात् इत्यत्र अकारान्तभिन्नस्थले च अमादेशाभावात् अव्याप्तिः स्यात् अतः यत्र अमादेशं विना श्रूयमाणा षष्ठी स्वार्थप्रकारकषष्ठ्यर्थविशेष्यकबोधजनिका न भवति इत्युक्तम्। तथा च उपकुम्भात् इत्यत्र श्रूयमाणा षष्ठी स्वार्थप्रकारकषष्ठ्यर्थविशेष्यकबोधजनिका न भवति अतः नाव्याप्तिः।

**नागेशमतविमर्शः॥**

आचार्यनागेशानुमतेन अव्ययीभावस्य लक्षणं भवतिअव्ययीभावत्वसंकेतविशेषसम्बन्धेन अव्ययीभावपदवत्त्वमिति। पूर्वपदार्थप्रधानत्वादिलक्षणं तु अयुक्तमेव इति स्पष्टम्। किञ्च कुम्भादिपदे लक्षणा अपि स्वीकर्तुं न शक्यते लक्षणास्वीकारे पूर्वपदार्थप्रधानोऽव्ययीभावः इत्युत्सर्गस्य बाधः स्यादेव। अतः पूर्वपदार्थप्रधानोऽव्ययीभावः इति नियमः उत्सर्गः किन्तु उन्मत्तगङ्गम् इत्यत्र अव्याप्तेः

[11] कृष्णकान्तीटीका, पत्रसंख्या-241

द्वियमुनम् इत्यादौ अतिव्याप्तेः अव्ययीभावत्वसंकेतसम्बन्धेन अव्ययीभावपदवत्त्वमित्येव साधुलक्षणम्।

**जयकृष्णमतविमर्शः-** आचार्यमते अव्ययीभावस्य लक्षणं भवति “समासग्रस्तत्वे सति नानाविभक्तिभिरेकरूपतावत्पदत्वमव्ययीभावत्वम्”[12] इति। न च अकारान्ताव्ययीभावानां तृतीयापञ्चमीसप्तमीषु च अमादेशेन एकरूपताभावात् कथं लक्षणमिदं सङ्गच्छते इति चेत् तेषामपि बह्वीषु विभक्तिषु अमादेशवत्त्वेन एकरूपतायोगान्नाव्याप्तिः। अथवा नानाविभक्तिभिः नाम अनेकविभक्तिभिरित्यर्थः। वस्तुतस्तु लक्षणे असति बाधके इति पदमपि देयम्। तेन समासग्रस्तत्वे सति असति बाधके नानाविभक्तिभिरेकरूपतावत्पदत्वमव्ययीभावत्वम् इति लक्षणं साधु भवति। अकारान्ताव्ययीभावस्थले तु एकरूपतायां “नाव्ययीभावादतोऽम्त्वपञ्चम्याः”[13], “तृतीयासप्तम्योर्बहुलमि”[14]ति सूत्रयोः बाधकसत्त्वात् नाव्याप्तिः इति ध्येयम्।

**मीमांसामतविमर्शः-**तत्र “पूर्वपदार्थप्रधानोऽव्ययीभावः, यद्वा अव्ययार्थप्रधानोऽव्ययीभावः”[15] इति अव्ययीभावलक्षणस्वीकारे उक्तदोषाः स्युः अतः अव्ययार्थप्रधानत्वाविद्यमानावयवार्थत्वविशिष्टान्यपदार्थप्रधानत्वान्यतरत्वमव्ययीभावत्वम्[16] इति स्वीकार्ययम्। अधिहरि इत्यादेः अव्ययार्थप्रधानत्वात् उन्मत्तगङ्गमित्यादेश्च अविद्यमानावयवार्थत्वविशिष्टान्यपदार्थप्रधानत्वात् न क्वचिद्दोषः इति तन्मताशयः।

**प्रकाशिकाकारमतविमर्शः-**आचार्येण जगदीशेन अव्ययीभावसमासस्य स्वरूपं द्वाभ्यां कारिकाभ्यां प्रकाशितम् अस्ति। तत्र प्रथमकारिकया उत्तरपदार्थान्वितस्वार्थरूपाव्ययपूर्वपदविशिष्टः स्त्रीपुंलिङ्गविवर्जितः नपुंसकमात्रलिङ्गः समासः अव्ययीभाव इति तत्स्वरूपमुक्तम, किन्तु लक्षणमिदं न निर्दुष्टमतः द्वितीयकारिकया परिष्कृतस्वरूपमुक्तमस्ति। तद्धि अमादेशाभावे सति श्रूयमाणा षष्ठी

---

[12]सारमञ्जर्याः समासवादे, पत्रसंख्या-65

[13]पाणिनिसूत्रम्-2/4/83

[14]पाणिनिसूत्रम्-2/4/84

[15]भाट्टचिन्तामणिः, पत्रसंख्या-107

[16]भाट्टचिन्तामणिः, पत्रसंख्या-107

यत्समुयार्थप्रकारकस्वार्थविशेष्यकबोधजनिका न भवति, सः समुदायः अव्ययीभावः इति। तथा च न क्वापि दोषः इति जगदीशमतविमर्शः।

**उपसंहारः-** अत्र प्रबन्धे चत्वारि मतानि उपस्थापितानि। तत्तन्मतेषु समागतानां दोषाणां परिहारः अपि कृतः विद्यते। एतेषां मतानाम् अध्ययनेन शास्त्रकाराणां चिन्तनशैली कथमिति सम्यक् ज्ञायते। स्वशास्त्राध्ययनकाले अन्यशास्त्रकाराणां मतानि पूर्वपक्षत्वेन तद्ग्रन्थेषु आगच्छन्ति, तत्र च दोषान् उद्भाव्य स्वमते समाधानं दीयते। किन्तु तत्तच्छास्त्रे तेषां दोषाणां समाधानमपि विद्यते अतः पूर्वपक्षोऽपि पूर्वपक्षग्रन्थमादाय अध्येतव्यः। अस्मिन् प्रबन्धे मया तत्तद्ग्रन्थमादाय एव मतानि उपस्थापितानि। अतः मीमांसकमते अपि न कश्चिद्दोषः नापि नैयायिकमते, किन्तु व्युत्पत्तिवैचित्र्यात् लक्षणभेदः इति मदीयं मतम्।

**परिशीलितग्रन्थसूची-**


1. सानुवादा सारमञ्जरी। तर्कालङ्कारजयकृष्णः। स्वामी लोकेश्वरानन्दः। कलिकाता: रामकृष्णमिशन्-इन्सटीट्युट्-आप-कालचार। 1997।
2. रवीन्द्रनाथशास्त्रिकृतटिप्पणीसहिता सारदीटीकया समलङ्कृता तर्कालङ्कारजयकृष्णः। शब्दार्थसारमञ्जरी सारमञ्जरी वा। कालीपदतर्काचार्यः। अशोककुमारवन्द्योपाध्यायः(सम्पा.)। । कलिकाता विवेकानन्दररोड्, बलरामप्रकाशनी। 1415 बङ्गाब्दः।
3. किरणावलीसमाख्यव्याख्योपेतान्यायसिद्धान्तमुक्तावली। भट्टाचार्यविश्वनाथपञ्चाननः। श्रीकृष्णवल्लभशास्त्री। श्रीकृष्णवल्लभशास्त्री। वाराणसी: चौखम्बासंस्कृतसंस्थानम्। 2018।
4. कृष्णकान्तीटीकया प्रबोधिनीटीकया च समलङ्कृताशब्दशक्तिप्रकाशिका। भट्टाचार्यजगदीशः। कृष्णकान्तविद्यावागीशः, रामभद्रसिद्धान्तवागीशः। ढुण्ढिराजशास्त्री। वाराणसी: चौखम्बासंस्कृतसंस्थानम्। 2002।
5. किरणावलीसंस्कृतव्याख्योपेता परमलघुमञ्जूषा। नागेशः। लोकमणिदाहालः। श्रीनिवासशर्मा। चौखम्बा। 2018।

6. बालमनोरमातत्त्वबोधिनीसहिता सिद्धान्तकौमुदी(द्वितीयो भागः)। भट्टोजिदीक्षितः। वासुदेवदीक्षितः, ज्ञानेन्द्रसरस्वतिः। चौखम्बा। 2017।

7. नागेशभावप्रकाशव्याख्यासहिता वैयाकरणसिद्धान्तलघुमञ्जूषा। नागेशः। महामहोपाध्यायः ब्रह्मश्री पेरिसूर्यनारायणशास्त्री। आचार्यः जानमद्दि रामकृष्णः। राष्ट्रियसंस्कृतविश्वविद्यालयः। 2021।

8. भाट्टचिन्तामणिः। तर्कपादगागाभट्टः। पण्डितसूर्यनारायणशुक्लः। चौखम्बा। 1933

9. वङ्गानुवादविवृतिव्याख्यया सहिता शब्दशक्तिप्रकाशिका(तृतीयभागः)। जगदीशतर्कालङ्कारः। मधुसूदनभट्टाचार्यः।संस्कृतमहाविद्यालयः(कलिकाता)। 1985।

10. न्यायकोशः। महामहोपाध्यायभीमाचार्यझल्कीकरः। महामहोपाध्यायः अभ्यंकरोपाह्ववासुदेशशास्त्री। निर्णयसागरमुद्रणालयः मुम्बइ। 1928।